# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा – शास्त्री (SEM-3) (New)** | **प्रश्नपत्रम् – 1** | गुणाः –70 |
| विषयः – अनिवार्यसंस्कृतम् | **कोड –C.F.2.3.3** | समयः - 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –09/10/2019 | सन्दर्भग्रन्थः – अभिज्ञानशाकुन्तलम् | |

---

**प्र. क्र.** **प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधोलिखितेषु कयोश्चिद् द्वयोः ससन्दर्भं व्याख्या कार्या।** १०

१ कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम् ॥

२ तत्साधुकृतसन्धानं प्रतिसंहर सायकम्।
आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि ॥

३ कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यकासु ॥

**प्रश्न २ निम्नलिखितयोः एकस्य सविस्तरम् उत्तरं लेख्यम्।** १०

१ काव्येषु नाटकं रम्यम्।

२ महाकविकालिदासस्य इतिवृत्तम्।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधोलिखितेषु कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्या कार्या।** १०

१ शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोऽभिभवाद् वमन्ति ॥

२ अभिमुखे मयि संहृतमीक्षणं हसितमन्यनिमित्तकृतोदयम्।
विनयवारितवृत्तिरतस्तया न विवृतो मदनो न च संवृतः ॥

३ क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः।

परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः ॥

**प्रश्न ४ अधोलिखितयोः एकस्य सविशदम् उत्तरं लिखत।** **१०**

१ शकुन्तलायाः चरित्रचित्रणम्।

२ तृतीयाङ्कस्य सारांशः।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोलिखितेषु कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्या कार्या।** **१०**

१ ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥

२ अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम् ॥

३ अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥

**प्रश्न ६ अधोलिखितयोः एकस्य सविस्तरम् उत्तरं लिखत।** **१०**

१ तत्र श्लोकचतुष्टयम्।

२ अभिज्ञानशाकुन्तले प्रकृतिवर्णनम्।

**प्रश्न ७ दशप्रश्नानाम् एकवाक्येन उत्तराणि लिखत।** **१०**

१ मङ्गलपद्ये कस्य भगवतः स्तुतिः ?

२ पूरुवंशप्रदीपः कः ?

३ ग्रीष्मर्तोः दिवसाः परिणामे कीदृशाः ?

४ नष्टशङ्का हरिणशिशवः कथं चरन्ति ?

५ कीदृग् यौवनं शकुन्तलाङ्गेषु सन्नद्धम् ?

६ विनीतवेषेण प्रवेष्टव्यानि कानि ?

७ स्यन्दनालोकभीतः गजः कुत्र प्रविशति ?

८ द्वितीयाङ्कारम्भः केन पात्रेण भवति ?

९ आरण्यकाः तपसः कतमं भागं ददति ?

१० दुष्यन्तस्य द्वाररक्षकः कः ?

११ दुष्यन्तशकुन्तले केन विवाहेन परिणीते ?

१२ शकुन्तलायै शापः केन प्रदत्तः ?

१३ शकुन्तलायाः पादपेषु कीदृक् स्नेहः ?

१४ शकुन्तलायाः पालकपिता कः ?

१५ सुलभकोपो महर्षिः कस्य विशेषणम् ?